শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্বাল্মীকীযে শ্রীমদানন্দরামাযণে সারকাণ্ডে

॥ শ্রীরামাষ্টকম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রীরামাষ্টকম্ ॥

শ্রীশিৱ উৱাচ

সুগ্রীৱমিত্রং পরমং পৱিত্রং
সীতাকলত্রং নৱমেঘগাত্রম্।
কারুণ্যপাত্রং শতপত্রনেত্রং
শ্রীরামচন্দ্রং সততং নমামি ॥ **1** ॥

সংসারসারং নিগমপ্রচারং
ধর্মাৱতারং হৃতভূমিভারম্।
সদাঽৱিকারং সুখসিন্ধুসারং
শ্রীরামচন্দ্রং সততং নমামি ॥ **2** ॥

লক্ষ্মীৱিলাসং জগতাং নিৱাসং
লঙ্কাৱিনাশং ভুৱনপ্রকাশম্।
ভূদেৱৱাসং শরদিন্দুহাসং
শ্রীরামচন্দ্রং সততং নমামি ॥ **3** ॥

মন্দারমালং ৱচনে রসালং
গুণৈর্ৱিশালং হতসপ্ততালম্।
ক্রৱ্যাদকালং সুরলোকপালং
শ্রীরামচন্দ্রং সততং নমামি ॥ **4** ॥

ৱেদান্তগানং সকলৈঃ সমানং
হৃতারিমানং ত্রিদশপ্রধানম্।

গজেন্দ্রযানং ৰিগতাৰসানং
    শ্রীরামচন্দ্রং সততং নমামি॥ **5**॥

শ্যামাভিরামং নযনাভিরামং
    গুণাভিরামং ৰচনাভিরামম্।
ৰিশ্ৰপ্রণামং কৃতভক্তকামং
    শ্রীরামচন্দ্রং সততং নমামি॥ **6**॥

লীলাশরীরং রণরঙ্গধীরং
    ৰিশ্বৈকসারং রঘুৱংশহারম্।
গম্ভীরনাদং জিতসর্ৱৰাদং
    শ্রীরামচন্দ্রং সততং নমামি॥ **7**॥

খলে কৃতান্তং স্বজনে ৰিনীতং
    সামোপগীতং মনসা প্রতীতম্।
রাগেণ গীতং ৰচনাদতীতং
    শ্রীরামচন্দ্রং সততং নমামি॥ **8**॥

শ্রীরামচন্দ্রস্য ৰরাষ্টকং ৎৱাং
    মযেরিতং দেৱি মনোহরং যে।
পঠন্তি শৃণ্ৱন্তি গৃণন্তি ভক্ত্যা
    তে স্বীযকামান্ প্রলভন্তি নিত্যম্॥ **9**॥

॥ শ্রীরামাষ্টকং সমাপ্তম্॥